✧˖°*❋ ❋*°˖✧

# लक्ष्मी स्तोत्र – इन्द्रकृत ब्रह्मवैवर्तमहापुराण
# (Lakshmi Stotram)

✧˖°*❋ ❋*°˖✧

# लक्ष्मी स्तोत्र

**इन्द्र उवाच**

ऊँ नम: कमलवासिन्यै नारायण्यै नमो नम: ।
कृष्णप्रियायै सारायै पद्मायै च नमो नम: ॥1॥

पद्मपत्रेक्षणायै च पद्मास्यायै नमो नम: ।
पद्मासनायै पद्मिन्यै वैष्णव्यै च नमो नम: ॥2॥

सर्वसम्पत्स्वरूपायै सर्वदात्र्यै नमो नम: ।
सुखदायै मोक्षदायै सिद्धिदायै नमो नम: ॥3॥

हरिभक्तिप्रदात्र्यै च हर्षदात्र्यै नमो नम: ।
कृष्णवक्ष:स्थितायै च कृष्णेशायै नमो नम: ॥4॥

कृष्णशोभास्वरूपायै रत्नपद्मे च शोभने ।
सम्पत्त्यधिष्ठातृदेव्यै महादेव्यै नमो नम: ॥5॥

शस्याधिष्ठातृदेव्यै च शस्यायै च नमो नम: ।
नमो बुद्धिस्वरूपायै बुद्धिदायै नमो नम: ॥6॥

वैकुण्ठे या महालक्ष्मीर्लक्ष्मी: क्षीरोदसागरे ।
स्वर्गलक्ष्मीरिन्द्रगेहे राजलक्ष्मीर्नृपालये ॥7॥
गृहलक्ष्मीश्च गृहिणां गेहे च गृहदेवता ।
सुरभी सा गवां माता दक्षिणा यज्ञकामिनी ॥8॥

अदितिर्देवमाता त्वं कमला कमलालये ।
स्वाहा त्वं च हविर्दाने कव्यदाने स्वधा स्मृता ॥9॥

त्वं हि विष्णुस्वरूपा च सर्वाधारा वसुन्धरा ।
शुद्धसत्त्वस्वरूपा त्वं नारायणपरायणा ॥10॥

क्रोधहिंसावर्जिता च वरदा च शुभानना ।
परमार्थप्रदा त्वं च हरिदास्यप्रदा परा ॥11॥

यया विना जगत् सर्वं भस्मीभूतमसारकम् ।
जीवन्मृतं च विश्वं च शवतुल्यं यया विना ॥12॥

सर्वेषां च परा त्वं हि सर्वबान्धवरूपिणी ।
यया विना न सम्भाष्यो बान्धवैर्बान्धव: सदा ॥13॥

त्वया हीनो बन्धुहीनस्त्वया युक्त: सबान्धव: ।
धर्मार्थकाममोक्षाणां त्वं च कारणरूपिणी ॥14॥

यथा माता स्तनन्धानां शिशूनां शैशवे सदा ।
तथा त्वं सर्वदा माता सर्वेषां सर्वरूपत: ॥15॥

मातृहीन: स्तनत्यक्त: स चेज्जीवति दैवत: ।
त्वया हीनो जन: कोऽपि न जीवत्येव निश्चितम् ॥16॥

सुप्रसन्नस्वरूपा त्वं मां प्रसन्ना भवाम्बिके ।
वैरिग्रस्तं च विषयं देहि मह्यं सनातनि ॥17॥

वयं यावत् त्वया हीना बन्धुहीनाश्च भिक्षुका: ।
सर्वसम्पद्विहीनाश्च तावदेव हरिप्रिये ॥18॥

राज्यं देहि श्रियं देहि बलं देहि सुरेश्वरि ।
कीर्तिं देहि धनं देहि यशो मह्यं च देहि वै ॥19॥

कामं देहि मतिं देहि भोगान् देहि हरिप्रिये ।
ज्ञानं देहि च धर्मं च सर्वसौभाग्यमीप्सितम् ॥20॥

प्रभावं च प्रतापं च सर्वाधिकारमेव च ।
जयं पराक्रमं युद्धे परमैश्वर्यमेव च ॥21॥

फलश्रुति:
इदं स्तोत्रं महापुण्यं त्रिसंध्यं य: पठेन्नर: ।
कुबेरतुल्य: स भवेद् राजराजेश्वरो महान् ॥
सिद्धस्तोत्रं यदि पठेत् सोऽपि कल्पतरुर्नर: ।
पंचलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ॥
सिद्धिस्तोत्रं यदि पठेन्मासमेकं च संयत: ।
महासुखी च राजेन्द्रो भविष्यति न संशय: ॥

**॥ इति श्री ब्रह्मवैवर्त महापुराणे इन्द्र कृतं लक्ष्मी स्तोत्रं सम्पूर्णम् ॥**

≪ • ◦ ❈ ◦ • ≫

# Lakshmi Stotram

**indra uvāca**

oṁ namaḥ kamalavāsinyai nārāyaṇyai namo namaḥ ।
kṛṣṇapriyāyai sārāyai padmāyai ca namo namaḥ ॥1॥

padmapatrekṣaṇāyai ca padmāsyāyai namo namaḥ ।
padmāsanāyai padminyai vaiṣṇavyai ca namo namaḥ ॥2॥

sarvasampatsvarūpāyai sarvadātryai namo namaḥ ।
sukhadāyai mokṣhadāyai siddhidāyai namo namaḥ ॥3॥

haribhaktipradātryai ca harṣhadātryai namo namaḥ ।
kṛṣṇavakṣaḥsthitāyai ca kṛṣṇeśāyai namo namaḥ ॥4॥

kṛṣṇaśobhāsvarūpāyai ratnapadme ca śobhane ।
sampattyadhiṣṭhātr̥devyai mahādevyai namo namaḥ ॥5॥

śasyādhiṣṭhātr̥devyai ca śasyāyai ca namo namaḥ ।
namo buddhisvarūpāyai buddhidāyai namo namaḥ ॥6॥

vaikuṇṭhe yā mahālakṣmīr̥lakṣmīḥ kṣīrodasāgare ।
svargalakṣmīrindragehe rājalakṣmīrnṛpālaye ॥7॥

gṛhalakṣmīśca gṛhiṇāṁ gehe ca gṛhadevatā ।
surabhī sā gavāṁ mātā dakṣiṇā yajñakāminī ॥8॥

aditirdevamātā tvaṁ kamalā kamalālaye ।
svāhā tvaṁ ca havidāne kavyadāne svadhā smr̥tā ॥9॥

tvaṁ hi viṣṇusvarūpā ca sarvādhārā vasundharā |
śuddhasattvasvarūpā tvaṁ nārāyaṇaparāyaṇā || 10 ||

krodhahiṁsāvarjitā ca varadā ca śubhānanā |
paramārthapradā tvaṁ ca haridāsyapradā parā || 11 ||

yayā vinā jagat sarvaṁ bhasmībhūtamasārakam |
jīvanmṛtaṁ ca viśvaṁ ca śavatulyaṁ yayā vinā || 12 ||

sarveṣāṁ ca parā tvaṁ hi sarvabāndhavarūpiṇī |
yayā vinā na sambhāṣyo bāndhavairbāndhavaḥ sadā || 13 ||

tvayā hīno bandhuhīnastvayā yuktaḥ sabāndhavaḥ |
dharmārthakāmamokṣāṇāṁ tvaṁ ca kāraṇarūpiṇī || 14 ||

yathā mātā stanandhānāṁ śiśūnāṁ śaiśave sadā |
tathā tvaṁ sarvadā mātā sarveṣāṁ sarvarūpataḥ || 15 ||

mātṛhīnaḥ stanatyaktaḥ sa cejjīvati daivataḥ |
tvayā hīno janaḥ ko'spi na jīvatyeva niścitam || 16 ||

suprasannasvarūpā tvaṁ māṁ prasannā bhavāmbike |
vairigrastaṁ ca viṣayaṁ dehi mahyaṁ sanātani || 17 ||

vayaṁ yāvat tvayā hīnā bandhuhīnāśca bhikṣukaḥ |
sarvasampadvihīnāśca tāvadeva haripriye || 18 ||

rājyaṁ dehi śriyaṁ dehi balaṁ dehi sureśvari |
kīrtiṁ dehi dhanam dehi yaśo meyaṁ ca dehi vai || 19 ||

kāmaṁ dehi matiṁ dehi bhogān dehi haripriye ।
jñānaṁ dehi ca dharmaṁ ca sarvasaubhāgyamīpsitam ॥20॥

prabhāvaṁ ca pratāpaṁ ca sarvādhikārameva ca ।
jayaṁ parākramaṁ yuddhe paramaiśvaryameva ca ॥21॥

phalaśruti:
idaṁ stotraṁ mahāpuṇyaṁ trisaṁdhyaṁ yaḥ paṭhennaraḥ ।
kuberatulyaḥ sa bhaved rājarājeśvaro mahān ॥
siddhastotraṁ yadi paṭhet so'pi kalpatarurnaraḥ ।
pañcalakṣajapenaiva stotrasiddhirbhavennṛṇām ॥
siddhistotraṁ yadi paṭhenmāsamekaṁ ca saṁyataḥ ।
mahāsukhī ca rājendraḥ bhaviṣyati na saṁśayaḥ ॥

**॥ iti śrī brahmavaivarta mahāpurāṇe indra kṛtaṁ lakṣmī stotraṁ sampūrṇam ॥**

✧˖⋯⋯°*❋ ❋*°⋯⋯˖✧